सुमध्वविजयभावप्रकाशिका
नमो जयात्मने यन्त्रे द्विजराजस्फुरच्छ्रिये।
हरेरजस्य प्रिय ते हरये देवतात्मने॥ १॥
कृष्णाय वासुदेवाय वेदव्यासाय च। नित्यं-सततम्।
अनाकुलं-गोकुलम् अविनाशिवाग्जातं वेदः॥ २॥
तमस्तु अज्ञानकारणं-तत्त्वप्रदीपात्मको ग्रन्थः तेजोगणश्च वस्तुतत्त्वानां प्रदीपाकृतिः॥ ४॥
अवताराणां लीलाम्॥ ५॥
'बळित्था तद्वपुषे धायि दर्शतम्', 'भूषन्न योधि बभ्रुषु नम्रते तां सुते कीर्तिं मघवन् महित्वा' इति सूक्तानि। 'विष्णोः पदे परमे मध्व उत्सः विद्वान् मध्व उज्जभारा दृशे कम्' इत्यादयो मन्त्रवर्णाः॥ ६॥
गुणग्राहित्वादयो गुणाः तैराढ्याः॥ ६॥
अपरं वा अपरपूर्वीकारं वा॥ ८॥
तीर्थविघ्नकरं दुष्टगजं हत्वा प्रतोषिताः।
भरद्वाजादयो धन्यं पुत्रं केसरिणो ददुः॥ ९॥
पराक्रमोत्साहमतिप्रतापैः सौन्दर्यमाधुर्यदयानयैश्च।
गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः को ह्यधिकस्त्रिलोक्याम्॥
प्रवीविविक्षोरिव सागरस्य लोकान् दिधक्षोरिव पावकस्य।
लोकक्षयेष्वेव यथाऽन्तकस्य हनूमतः स्थास्यति कः पुरस्तात्॥
ससूत्रवृत्त्यर्थपदं महार्थं ससङ्ग्रहं साध्यति वै कपीन्द्रः॥
न ह्यस्ति कश्चित् सदृशोऽस्ति शास्त्रे वैशारदे छन्दगतौ तथैव॥
-इत्युत्तररामायणे गुणकथनम् (७/३६/४१-४३)॥ १०॥
गुणग्रहीत्रा-दोषेतरग्राहिणा ज्याकर्षणेन च।
पक्षो भागः पतत्रं च॥ १४॥
गोभिः वाग्भिरद्भिश्च। सीता-सीरजा। सस्यं च॥ १५॥
पलाशिनो वृक्षा मांसादाश्च॥ १५॥
अपक्षपातित्वं सत्सु गुणानुकूल्येन स्थितिः। भोगो नामहि शरीरं च॥ १६॥
पुरं-देहश्च। योगी गूढपुरुषः समाधिविपाकवांश्च। अदारिभावेन अदो राक्षसः तस्यारित्वेन दारो दलनं तद्रहितत्वेन अमृतत्वेन॥ ३२॥
बकः पक्षिविशेषश्च॥ ३४॥
चण्डरणं-चण्डानां रणं च॥ ३६॥
बार्हद्रथं-जरासन्धं बृहद्रथसम्बद्धं च॥ ३६॥
पार्थिवा राजानो वृक्षाश्च। तेजः पराक्रमश्च॥ ३८॥
अभोगः परिपूर्णता। द्विजिह्वान् भुजगान् रत्नवत् प्रधानान् कोपाधिकान् द्विजिह्वान् मत्सरिणो मणिमत्प्रभृतीन् क्रोधवशश्च॥ ३९॥
वायुप्रभवो भीमः। क्रमेण सुव्यक्ततेजा अग्निः क्रमेण वायुप्रवृद्धः। आशा इच्छाविशेषा दिशश्च। 'स्वनन्ति येऽनिलोद्भूता वेणवस्ते तु कीचकाः' इति च॥ ४०॥
कृष्णेन वर्त्म यस्येति कृष्णवर्त्मा भीमः। विजयो वायुरर्जुनश्च हेतिरायुधं तेजश्च। भीष्मद्विजाद्यैः भीषणपक्षिमृगैश्च॥ ४१॥
धार्तराष्ट्राः-शितेतरचरणा नरा हंसाश्च॥ ४२॥
प्रघातो युद्धं घटनं च॥ ४५॥
रसो वीर्यमुदकं च॥ ४५॥

आखुभुगादिवदव्यक्ताभिप्रायत्वमस्य ।। ४८ ।।
न दिधक्षति 'लट् स्म' (३/२/११८) इति सूत्रादतीतार्थत्वम् ।। ५३ ।।
अविदुषामिति । तस्मादविदुषां नराणाम् ।। ५४ ।।
आनन्दाद्यैरित्यादिसमस्तश्लोकपदेन आनन्दात्मकोऽयं ग्रन्थः ।। ५५ ।।
द्वितीयः सर्गः
कृतादीनि त्रीणि अवतर्तुमिष्टान्यस्येति त्रियुगः ।
युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यते । इति च ।। २ ।।
वर्णोऽक्षरः गुणश्च ।। ४ ।।
रजतपीठपुरस्य 'वडिपु' इत्यपभ्रष्टभाषा ।। ६ ।।
महाय-अयनसङ्क्रमणोत्सवाय ।। ६ ।।
विश्वजनीनम्-विश्वजनहितम् । 'आत्मन् विश्वजनभोगोत्तरपदात् स्व' (४/१/९) इति ।। ८ ।।
शिवरूप्यनामा शिवळ्ळीत्यपभ्रष्टभाषायाम् ।। १० ।।
विश्वपाजात्-विश्वपालकादजात् रामान्निमित्तात् । स तत्र परश्वादिना तीर्थं चकारेति ।। ११ ।।
अच्छत्वादीनि महाविवेकादीनि विशेषणानि दम्पत्योर्द्रष्टव्यानि ।
स्वानन्द एव सन्ततिर्मध्वः । 'हनूमान् भीम आनन्दः' इति तद्रूपाणि ।। १३ ।।
रजतपीठपुरस्य नारायणत्वं निश्चीयते-
स्वदर्शनोरुव्रतिने निशीथे प्राप्ताय भोगीन्द्रगतो हरिः प्रभुः ।
स्वं दर्शयित्वा खलु कुञ्जमाधवद्विजाय तद्वत् प्रतिमां व्यधापयत् ।। १५ ।।
'समुचिते' इति ऋतू रजोदर्शनात् पञ्चमादिः । शरदादिश्च । अम्बरं वसनं गगनं च । आद्यस्य विष्णोः पक्षपातात् पूर्वपक्षाच्च ।। २३ ।।
लक्षणचणं- लक्षणैः प्रसिद्धम् । 'तेन वित्तश्चंचुप् चणपौ' (५/२/२६) इति । नवशब्दः एकोनदशके भद्रे च । परमस्य सुन्दरमन्दिरं परमाणि सुन्दरमन्दिराणि नगरे । परं शत्रुं च ।। २५ ।।
विवाहाय गच्छतां केषाञ्चिदुन्दुभिनादपूर्वात् । एवमपरश्च तदनन्दरमेव दुन्दुभिनादोऽश्रावीति भावः ।। २७ ।।
वा ज्ञानम् । 'वा गतिगन्धनयोः' 'आतो मनिन् क्वनिब्वनिपश्च' - (३/२/७४) इति न्यायात् तस्येदमित्यण् । वासुदेवभक्तोऽपि वासुदेवः । अत एव वृद्धित्वात् ।। २९ ।।
पूर्वालयस्य 'मूडिल्लाय' इत्यपभ्रष्टभाषा ।। ३० ।।
अत्रस्तम्-अभयम्-अदुष्टम् । 'मणिदोषस्त्रास' इति च ।। ३१ ।।
प्ररुदितं प्ररोदनं 'आदिकर्मणि क्तः कर्तरि च' (३/४/७१) इति ।। ३६ ।।
पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः ।। ३७ ।।
विषे पीते ।-
वायुरस्मा उपामन्थत् पिनष्टि स्मा कुनन्नमा ।
केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह ।। - ऋग्वेद (१०/१३६/७) इति श्रुतिः ।। ४१ ।।
किल परमार्थे ।। ४२ ।।
पदं-पादविन्यासो वाक्यावयवश्च ।। ४३ ।।
शालीनयेव अधृष्टयेव ।। ४३ ।।
चरतश्चरतः । चरगतिभक्षणयोः ।। ४५ ।।
शृङ्गं-विषाणं शिखरं च । पादाश्च प्रत्यन्तपर्वताश्च ।। ४६ ।।
बीजान्तराणि - तिन्त्रिणीबीजाख्यानि । ५१ ।।

वासुदेवं-वासुदेवं वा वसुदेवसुतं हरिमिव ।। ५३ ।।
समजनि - 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' (३/१/६१)- इति कर्तरि चिण् ।। ५४ ।।
तृतीयः सर्गः
बन्धुगृहस्य नडुवैरीत्यपभ्रष्टभाषा ।। १ ।।
काननदेवतासदनस्य 'कुडवूरु' इत्यपभ्रष्टभाषा । अन्तरम्-अवटम् । नारिकेल्युपपदान्तस्य 'ताळकुडे' इत्यपभ्रष्टभाषा ।। ४ ।।
घृतवल्लीत्यस्य नेयम्पळ्ळीत्यपभ्रष्टभाषा ।। २१ ।।
धौतपटस्य 'मडिनाय' इत्यपभ्रष्टभाषा ।। २२ ।।
आदित्यचन्द्रादयो धर्मसाक्षिणः ।। ३५ ।।
पूगवनस्य 'तोटन्तिल्लाय' इत्यपभ्रष्टभाषा ।। ४९ ।।
'प्रियवयस्यः - उपाध्यायपुत्रः । तस्यानन्तातीतानि जन्मानि प्रकाशितवान् श्रीमध्वः ।। ५३ ।।
प्रकटभागवती- श्रीमन्नारायणोपनिषत् ।। ५४ ।।
चतुर्थः सर्गः
स्ववस्तु स्वस्वामिनं नित्याप्रतिहतं ब्रह्म ।। ५ ।।
अच्युतप्रेक्षः - प्रेक्षा प्रज्ञा प्रतिभेति ।। ६ ।।
विप्रतिसारः पश्चात्तापः ।। ८ ।।
वचस्विनि । 'अस्मायामेधास्रजो विनिः (५/२/१२१) इति विनिः ।। १२ ।।
सुताननेन्दोरस्मरत् 'अधीगर्थदयेशां कर्मणि' (२/३/५२) इति कर्मणि षष्ठी ।। १८ ।।
महानदी 'नेत्रावती' । ग्रामवरस्य 'कार्यूरु' इत्यपभ्रष्टभाषा । मठान्तरस्य 'कुत्याडि' इत्यपभ्रष्टभाषा ।। १९ ।।
वदन्ति सन्तः-
वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ।। २२ ।।
'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुतौ श्रुतः ।। २३ ।।
भक्षणादि समस्तकर्म कृत्वा 'भूः सन्यस्ता मया' इत्यादिसमस्तन्यसनाभिधानम् ।। ३१ ।।
'दशप्रमतिं जनयन्त' (ऋग्वेद २/१४१/२) इति मन्त्रवर्णः ।। ३३ ।।
अच्युते आत्मा बुद्धिः प्रज्ञा अस्येति अच्युतात्मा अच्युतप्रज्ञः ।। ३८ ।।
असङ्गभूषा-
सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
सद्भिः सह स कर्तव्यः सन्तः सङ्गस्य भेषजम् ।। ३९ ।।
त्रिदिनं य उपन्यासं व्यधाद्विद्वान् निरन्तरम् ।
वैशेषिकाग्र्यो विजितो वासुदेवाह्वयोऽमुना ।। ४३ ।।
'वेद पुरा' वेदेत्यस्य लडादेशत्वात् 'यावत् पुरा निपातयोर्लट् (३/३/४) इति सूत्रादतीतार्थत्वम् ।। ५३ ।।
पञ्चमः सर्गः
आनन्दाय तीर्थं शास्त्रमस्येत्यानन्दतीर्थः । आनन्देन विष्णुना शुद्ध इति वा ।। २ ।।
अत्र भिदायाम् । अनुमानम्- 'विमतौ भिन्नौ नियम्यनियामकत्वात् राजपुरुषवत्' इति । किमिदं विशेषणं पक्षाद्भिन्नमाहोस्विदभिन्नमुत भिन्नाभिन्नम् । नाऽदिमः सम्बन्धापेक्षयाऽनवस्थानात् । न मध्यमः पक्षमात्रस्य विशेषणमात्रस्य वाऽभिप्रेतत्वप्रसङ्गात् । न चान्तिमः उभयदोषापातात् । व्यवस्थाया अपरिदृश्यमानत्वादित्यखण्डयत् । इदं च विशेषविनिर्मुक्तानां विशेषणनिग्राहकम् ।। ४ ।।
घटादिनिदर्शनमसम्प्रतिपन्नमिति चेत् शुक्तिरजतादि च बाध्यत्वादसत्वेनानुभूयमानं सदसद्विलक्षणतया न सम्प्रतिपन्नम् । तत् साधयिष्यते चेदिदं प्रत्यक्षेण साधितमित्युत्तरमिति इति 'आदि'शब्दाभिप्रेतम् ।। ५ ।।

तदप्रतिष्ठां प्रतिपादुकः 'लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् (३/२/५४) इत्युकञ् प्रत्ययः ॥ ७ ॥
वैशेषिकविशेषज्ञो वादिसिंहाभिधो द्विजः ।
महीं विजित्य सम्प्राप्तो बौद्धाग्र्यं बुद्धिसागरम् ।
खण्डितस्तेन पाण्डित्यात् तत्पक्षापेक्षकोऽभवत् ।
तौ श्रुत्वा मध्ववैदग्धीं प्राप्तौ तद्गुरुमूचुतुः ।
वादिनौ वादकामौ द्वौ भगवांस्त्वामिताविति ।
बुद्ध्यब्धिबुद्धिमाश्रित्य परो वादी कथां व्यधात् ॥ ८ ॥
सदास्पदम् - नक्षत्रास्पदं च ॥ १३ ॥
सरस्वत्यो वाण्यो नद्यश्च ॥ १४ ॥
प्रसङ्गे तादृशे सति दुर्भाष्यदूषणादिरूपे ॥ २५ ॥
शुभपूर्णया-शुभेन सुकृतादिना पूर्णया शरदश्च शुभा पूर्णा तिथिः ॥ २९ ॥
न्याया युक्तयो धर्मप्रवृत्तयश्च । वर्त्मना मार्गेण सिद्धान्तेन च ॥ ३४ ॥
अस्मरत्- अत्र पयस्विनीतटे ॥ ३५ ॥
'अप्रांशुनूत्नोपपदाधिवासजः' इत्यस्य 'कु(दु)दिपुस्तूरु' इत्यपभ्रष्टभाषा ॥ ३८ ॥
कन्यातीर्थेऽत्र दुर्गा सन्निहिता सुजलावतारस्थाने ॥ ४२ ॥
असज्जनानां चापलैः ॥ ४६ ॥
अप्रांश्चद्याश्च तत्रोषुश्चातुर्मास्यं ततो विभोः ।
दीक्षाविघ्नं चिकीर्षन्तस्ताडनं चाभवत् खलु ॥ ४६ ॥
स्वातिशयान् ।
त्रिंशद्धाराहमनुवित् कश्चिद्योग्यास विस्मितः ।
सूचितेष्वेव सर्वेषु मध्वेनाभ्यधिकेष्वपि ॥ ४८ ॥
अब्जपतङ्गौ- चन्द्रार्कौ ॥ ५२ ॥
षष्ठः सर्गः
त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते ।
विष्णोः सहस्रनामापि निरन्तरशतार्थकम् ॥ इति वचनात् ॥ ४ ॥
'सङ्ख्याया अवयवे तयप्' इति (५/२/४२) सहस्रतयम् ॥
विश् प्रवेशने इति धातोर्विष्टं ज्ञानरूपं च विश्वम् । टु ओश्विगतिवृद्ध्योरिति च विना पक्षिणा श्वयतीति विश्वम् । 'तृतीयोऽतिशये' इति विश्वम् । विशेषेण व्याप्तत्वाच्च विशेषेण ज्ञानरूपत्वाच्च विशेषेण नित्यवृद्धत्वाच्च 'विश्वमेव हि सर्वम्' 'सर्वं पूर्णमिहोच्यते' इति न्यायेन पूर्णत्वाच्च विश्वम् । एवं 'विश्वो हिरण्यगर्भोऽग्निर्यम' इत्यादेविश्वस्य वायोरन्तर्यामित्वाच्च जाग्रत्प्रवर्तकस्य विश्वनामकत्वादित्यादिना रूपेण पञ्चाशदधिकार्थान् अभ्यधात् ॥ ७ ॥
'न वा उ देवा' (ऋग्वेद १०/११७/१) इति सूक्तम् । दद दाने इति ददो दाता । 'उतापृणन् मर्डितारं न विन्दत' इति अददनिन्दा । अपृणत् अददत् पुमान् पालकं न विन्दते । 'स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय' इति दातृप्रशंसनम् । भुङ्क्ते इति भोजः । स एव भोज इह परत्र च यो गृहवे ग्रहणयोग्याय ददाति ॥ १३ ॥
'पृणीयादिन्नाथमानाय' इति पृणीयाच्छब्दस्य 'पृण दाने' इति परिपठितं पृणधातुमवदत् । नाथमानाय- याचमानाय । 'प्रीङ् प्रीणने' इति धातुं परोऽवदत् ॥ १४ ॥
जडयन्-
प्रहसति पश्यति तिर्यक् समधिकरक्तेन लोचनेन रुषा ।
करकिसलयेन चोरुं प्रहरति च तदा सभा प्रचकम्पे च ॥ १५ ॥

कन्या३वारवायती सोममपि सुतादिवत्।
अस्तम्भरन्त्यब्रवीदिन्दाय सुनवै त्वा शक्राय सुनवै त्वा। इत्यादि सूक्तम्। पुरातनी कन्येति कम्पार्थः। सोमं वारवायती जनयन्ती सुताऽपि प्राप्ता चालभत। गृहं प्रत्यावहन्तीत्यब्रवीत्। इन्द्रायेत्यादि 'असौ य एषि वीरको गृहं गृहं विचाकशत्' (ऋ-८/९१) इत्यादि चादरेण। अपाला- 'अपालामिन्द्र त्रिष्टूत्व्यकृणोत् सूर्यत्वचमिति' (ऋ-८/९१/७) वपुःश्रीदानम्। स्वपाणिभ्यां त्रिरभिमृज्य संशोध्येति अपाला नवयौवनेति चोचे॥ १७॥
भूसुरप्रवराः श्रुतिद्रष्टारो मुनयो याजोपयाजकौ च। 'अङ्गानि' शीक्षादीनि करचरणादीनि च। सूत्राण्येव दीप्तमणयः सूत्रे गुणे दीप्तमणयः। २४॥
पादैः। सुन्दरपादैः क्रमैः तदभिप्रायैश्च चरणसुन्दरविन्यासक्रमविलासैश्च। 'भारतम्-उत्तमं येषु शास्त्रेषु' 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।' इति च। भारतेषूत्तमाः पाण्डवाः आच्छादनं गूहनं वृषलादिषु निवसनं च॥ २५॥
राजसूयादिषु वृत्तां-मन्त्रत्वेन यज्ञपत्नीत्वेन च॥ २६॥
मौलिसङ्ग्रहणम् उपनिषद्ग्रहणं केशग्रहणं च। मायी मायावादी व्याजी दुःशासनादिश्च। स्वेश्वरत्वं ब्रह्मत्वं साम्राज्यभोक्तृत्वं च॥ २७॥
सज्ञनैः- भीष्मादिभिश्च। सातिशोकमपि कैश्चन विदुरेण धर्मसाक्षिभिर्देवैश्च॥ २८॥
'वासुदेवो वा इदमग्र आसीत्', 'दाधर्थ पृथिवीमभितो मयूखैः।' 'आत्मेत्येवोपासीत' इत्यादि च। 'श्रीवासुदेव धरणीधर चक्रपाणे' इत्यादि च। हृदि स्वाभिप्राये मनसि च।
'ततो भूय इव ते तमो य उ विद्यायां रताः।
'अथ हैनमुपाक्रोशत् सत्यं भिदा सत्यं भिदा सत्यं भिदा।
मैवारुवण्व्य मैवारुवण्व्य मैवारुवण्व्यः। इत्यादिना।
नैष धर्म इति च।
एष ऐक्यवादः सदसि केशापकर्षणादिश्च॥ ३०॥
देहोपसङ्ग्रहस्यास्य यत्फलं देवचोदितम्।
तत्सिषाधयिषुर्यामि देवगुह्योपपादितम्। - इति च हेतुवादिनि॥ ३३॥
रजो गुणविशेषो धूलिश्च। मलयमण्डलं मलयसन्निकृष्टविषयो मलयगिरिवलयं च। सतामलिभिरनुयातः सदाऽलिभिश्च॥ ३४॥
श्रीभागवतादिशास्त्रस्यात्ममज्जनतः परिशोधनं प्रक्षेपोद्धारादिकम्॥ ३५॥
नितान्तमतिवर्तनं गत्या गुणैश्च।
गाङ्ग ओघः सकृत्सङ्गी शिरसि स्थितिमात्रेणाधःकृतशर्वश्च॥ ३६॥
बहुसत्वगुणमवन्तं समहाविषमोक्षमहानागं विषमऋषभतेजाः ऐक्षत वृषभाक्षः।
अयन्-गच्छन्॥ ५५॥
सुपुल्लैः कमलाकरैः सुहसितकमलायाः कराभ्यां च। गन्धर्वादिसुजनानां सुखाय अपरिमितशय्यासहितं सुजनसुखप्रयोजनं च। विकसितपुष्पसमूहवृक्षं देवसमूहगतं च। मरकतरत्नमयस्थलैरग्रा शोभा यस्य, स्थलवदग्रशोभं च॥ ५६॥
स्वशृङ्गहेम्ना प्रदीप्तगगनं हेमवत्प्रदीप्तं वस्त्रं च। कलापः समूहः। काञ्ची च कटको नितम्बो वलयं च। धरणीधरं गिरिं नारायणम्॥ ५७॥
सप्तमः सर्गः
सत्रं वनं यज्ञविशेषश्च॥ २॥
द्विजाः पक्षिणो ब्राह्मणाश्च॥ २॥
शाखिनो वृक्षाः ऐतरेयकौषीतकबाष्कलशाकल्यपैङ्गिकाठकादयश्च॥ २॥
श्रीशुकाचार्यमुख्यैः समयिभिश्च॥ ३॥
कमलेष्टतमः कमलारमणः कमलान्येवेष्टतमानि च॥ ३॥

परमहंसैः श्वेतच्छदश्रेष्ठैश्च ।। ३ ।।
अमेचकैः श्वेतैर्निर्मलैश्च ।। ३ ।।
पत्रं पलाशं पतत्रं च ।। १२ ।।
हरिगौः- सूर्यरश्मिः इन्द्रवज्रं च ।। १२ ।।
मुनीनां नन्दनं कश्यपपुत्रं च ।। १२ ।
अमृतं मोक्षश्च । श्रितानि साधुपुराणादिपुस्तकान्यस्मिन् । शाखासु प्रेङ्खेषु च ।। १३ ।।
सप्ततया-जटासहिततया ।। १५ ।।
हरिं परितः । 'अभितः परितः समया निकषाहाप्रतियोगेऽपि' (वार्तिकम् १/३८) इति कर्मत्वम् ।। ३० ।।
तुन्दिवलिवटेभ्यः ।। ३२ ।।
हृदये- अन्तर्बहिश्च ।। ३३ ।।
ब्रह्मसूत्रम्- वेदान्तसूत्रम् । उपवीतं च ।। ३३ ।।
'नास्ति नारायणसमम्' इति पत्रालम्बनश्लोको ब्रह्मसदसि ।। ३४ ।।
सहस्रार्थान् ऋषीनेषः यौगपद्येन पृच्छतः ।
सहस्रोत्तरदानेन युगपत् पर्यतोषयत् ।। ४० ।।
नखधूरादिति । अत्रोपसृष्टमिति च । स्मृतमिन्दिराया इति च ।। ४६ ।।
उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ।। इति च ।। ५० ।।
उदवाहः पेषंवासवाहनादिषु च (६/३/५८) इति ककारलोपः ।। ५३ ।।
अष्टमः सर्गः
कृष्णो देवकीपुत्रश्च ।। ३ ।।
परमार्थसङ्ख्यया परमार्थज्ञानेन भारकोट्यादिरूपया च ।। ३ ।।
अनिमिषेश्वरो मत्स्येश्वरः । हयमुखेन वपुषा उद्धतमसुरं निहत्य । सुरेश्वरो हयग्रीवेन वपुषा मधुम् ।। १४ ।।
अमराणामिन्द्रवैरिणां च अमरेन्द्रवैरिणो हिरण्याक्षस्य च धरस्य गिरेर्धराया भुवश्च । वराहवान् पुष्णातीति स्वभावकथनं वराहो वपुश्चास्य । वीचिमद्व्याप्तिके समुद्रे कूर्मतया गर्भीभावजननवृद्धिपरिणामापक्षयविनाशाख्योर्मिमत्संसृति समुद्रस्य कच्छं मोक्षं च पाति ।। १५ ।।
नरसिंहः पुरुषोत्तमश्च । कोपोदये सति नखरमण्डलपराक्रमेण । कोपोदयेन खरचक्रतेजसा च । सरसः सवीर्यः कासाराच्च । पृथुस्थैर्यं स्वस्य रिपुं दैत्यं च । पृथुभूतं सत्वं स्वकीयस्य रिपुं नक्रं च ।। १६ ।।
वामनरूपकोऽपि अधःकृतबलिनामकासुरः स्वजनाय इन्द्राय पदमदात् । बुद्धरूपो वामनोऽल्पशरीरो भूत्वा जिनस्य पुत्रतां प्रकाश्य अधःकृतबलवदसुरः स्वजनायैव मोक्षमदात् ।। १७ ।।
अमुं महाशक्तेस्तापसवरस्य भृगोरन्वयोद्भवं श्रीरामं कथयन्ति । त्रिलोकगुरोः शक्तितापसवरस्य च श्रीवेदव्यासं हरिमिव अर्कमिव । परशुरेव भासमानरश्मिरस्य मर्त्यदेवा राजान एव तमः । पराः शुभाश्चासमानाश्च गावो वाचः । मर्त्यानां देवानां तमस्त्वज्ञानम् ।। १८ ।।
सवसूनां देवानां मोददः पूर्वमहिमकरान्वयेऽभवत् श्रीरामः । यस्य जनको दशरथः । स हिमकरान्वयेऽभवत् श्रीकृष्णः । यस्य रथो दश दिशो जितवान् । अग्र्याणां सम्पदां जनको बभूव ।। १९ ।।
अथ शङ्खचक्रजन्म भरतशत्रुघ्नत्वेन अरीणां भयजन्म च । तममुष्य लक्ष्मणस्याग्रजं श्रीराममाहुः । अमुष्य श्रीकृष्णस्य च ।। २० ।।
तपस्विना विश्वामित्रेण वनमनीयत । जनकेन मुहुरादृतः । जनकेनानीयत । दुष्टजनो मारीचादिः कंसश्च । निशिचरीं ताटकां पूतनां च ।। २१ ।।
मुनीनां सप्ततन्तुर्यागः सजटासन्ततिश्च । क्रूरकेशवन्तम् अशुभस्थानं मुख्यं दुर्जनम् । उद्यतं सुबाह्वाख्यं राक्षसम् । केश्यरिष्टनामादिदुर्जनं

क्षपयन्तम्। उद्यतसुन्दरहस्तम्॥ २२॥
सवने यज्ञे। स कृष्णो वने। गावो नयनानि च॥ २३॥
प्राप्तकामानां तापसानां स्नेहार्द्रधीगिरो रमणीर्भद्राः। प्राप्तकामतापाः सरसा आर्द्रधीगिरो गोपिकाश्च॥ २३॥
सकलमित्रसंयुतो विश्वामित्रयुतो गोपयुतश्च।
भद्रां जनकराजवल्लभां मधुरां पितृप्रियाम्॥ २४॥
ईश्वरधनुः स्वयंवरानीतं कंसेन पूज्यमानं क्षपितम् उग्रसेनानां नृपपुत्राणां पौरुषमनेन धनुर्भङ्गेन। क्षपितः उग्रसेननृपपुत्रोऽपि येन तत्पौरुषमस्य कृष्णस्य॥
विप्रगुरुः- विश्वामित्रः सान्दीपनिश्च। अमेयेन स्वरूपतेजसा। जरासन्धविजयादिना पराक्रमेण च॥ २५॥
नृपसुतां- सीतां रुग्मिणीं च। राजशत्रवः परशुरामो राजानो एव शात्रवाश्च। अब्धिवद्दुर्गमम्। अब्धिना दुर्गमं च॥ २६॥
स जगाम वनं स कृष्णः सतामवनं विदधत्। मातृजनः कैकेयी अदितिश्च। महाजयध्वजेन लक्ष्मणाख्येन अग्र्यसुहृदा। अमुदा विना। महाविजयेन ध्वजचिह्नेन विना गरुडेन च॥ २७॥
पर्वतादिदुर्गमस्थानानि गिरिदुर्गादीनि च।
खरदूषणादीन् राक्षसान् विनिहत्य महातमो नरकमनयत्।
क्रूरदोषानादिदैत्यान् मुरादीन् निहत्य नरकदैत्यं च महातमोऽनयत्॥ २८॥
सुन्दराश्रमप्राङ्गणसम्बद्धतेजसा सीतया। आश्रमाजौ रचितोरुपराक्रमया सत्यया च।
आकुलीकृतसुरपालकारिसमूहहृत्। सुराणां पारिजातहृत्। धामतेजो गृहं च॥ २९॥
निजां श्रियं सीतां हरन्तं दशकं दशाननं हरितामधीशानां नराणां मण्डलं विजित्य परभीषणम् अन्यभयङ्करम्।
निजानां पाण्डवानां श्रियं हरन्तं सुयोधनम्।
हरितां दशकम्। अधिकेशनरदेवसमूहं विजित्य स्फुरिताम्॥ ३०॥
पवननन्दनो हनूमान् भीमश्च। गवा इन्द्रसुतवर्धकः। शरेण वालिच्छेदकः। वाचाऽर्जुनाप्यायकश्च। हरिसूनवे सुग्रीवाय युधिष्ठिराय च। दयिताया दयितानां च॥ ३१॥
उरुवार्तया मरुत्सुतमुखेन प्रवृत्तया मरुत्सुतादिप्रवृत्तया च।
हरितिग्मचक्रं वानरतीक्ष्णसैन्यं रविवत् तीक्ष्णचक्रं सुदर्शनं च।
राक्षसाः पुण्यजनाश्च॥ ३२॥
कुम्भकर्णाख्यगजराजमक्षिणोत्। ससहोदरं सरावणं सेन्द्रजितं पृथुसैन्यं भुवो भारायितं धरणीभरं पृथुसैन्यं च कृष्णः पृथुमस्तककर्णगजराजं ससहः सौजस्कम्। अदरं निर्भयं सदैत्यम्। इषूणां चक्रेण इषुभिश्चक्रेण च॥ ३३॥
हुतवहं प्रविष्टया शपथरूपेण स्वर्गारोहणकाले रुग्मिण्या च धाम- अयोध्यां वैकुण्ठं च॥ ३४॥
विदिताद् विष्णुयशोनिमित्तादमलात्मनो द्विजान्महिदासनामा पूज्यचरणोऽभूत्। महिभिर्दासैः पूज्यचरणः कल्की विष्णुयशसोऽभूत्॥ ३५॥
बहुधा प्रकारेण महोपद्रववति जगति स्फुटवाक्यस्थितिं वैष्णवतन्त्रशास्त्रविरचनया बहुधामहेतिं बहुतेजस्कमायुधम्॥
अतिदीप्तवज्रवत् स्थितिम्॥ ३५॥
सुतपसो रुचिप्रजापतेः पापपङ्करहितादपापात् कर्दमप्रजापतेः सुतपोवाञ्छात्। मानवी आकूतिः देवहूतिश्च देवराड् इन्द्रः कालेन देवानजीजनत्। सदेवश्रेष्ठः सुमनसः सज्ञानान् सुभक्तिपूर्णानकरोत् साङ्ख्यसमयेन कृतेन॥ ३६॥
वरस्मितादिविलासवती धन्वन्तरितनुः पयसान्धरस्य च परस्परघट्टनात् प्रकटीभवन्ती नवयौवनाकृतिः विलासिनीतनुः वरस्त्रीमूर्तिः स्तनपरस्परसंहत्या स्पष्टयौवनवती आकृतिरस्याः।
असुराणामहितां असुरेष्वाहिताम्॥ ३७॥
दत्तनामा सुजनायात्मशुद्धिदः सुकुमाररूपी भद्रः सुजनाय दत्तं पदं पुनर्येन कुमाररूपी अत्रिणा ऊढया अनसूयया धृतो मुनिश्रेष्ठैर्धृतया असूयारहितया शुद्धमनीषया ध्यातश्च॥ ३८॥

ऋषभो नाम राजा भूत्वा यतीन्द्रलक्षणं वपुरुद्वहन् एष सतां दयितः ऋषभः प्रियः स्वामी धरणीधरः श्रेष्ठश्चेतच्छदलक्षणवपुरुद्वहन्॥ ३९॥

अयं हरिनामा उदपादि हरिर्ह्ययं धर्मतनयो नारायणो नाम॥ ४०॥

महीधरो गिरिर्हरिश्च। द्विजराजश्चन्द्रो व्यासश्च॥ ५२॥

नवमः सर्गः

सर्वेषामपि भक्तानामनुल्लङ्घ्यं क्षणं स्मरन्।

गमनत्वरितो मध्वः सर्वेभ्योऽपि क्षणं ददौ॥ ७॥

भारतीविजय-संविदानन्द-ब्रह्मघोष-शतानन्द-उद्धर्त-विजय-रुद्रभट्ट-वामन-यादवप्रकाश-रामानुज-भर्तृप्रपञ्च-द्रविड-ब्रह्मदत्त-भास्कर-पिशाच-वृत्तिकार-विजयभट्ट-विष्णुक्रान्त-वादीन्द्र-माधवदास-सङ्करकृतान्येकविंशतिकुभाष्याणि॥ १२॥

कः प्राप्नुयाद् ब्रह्मा च॥ २६॥

एकदृष्टिमिव काकमिव रूपिणमैक्यज्ञानमिव च।

मानसात् मनसः सरःश्रेष्ठाच्च॥ ३५॥

सुसमयप्रकाशनात् सुशास्त्रव्याख्यानात् सुकालोदयाच्च॥ ३८॥

महादरेण- महाबहुमानेन, शङ्खेन च। सुदर्शनं- सच्छास्त्रं, चक्रं च॥ ३९॥

दैवतप्रतिभया दैवतलब्धप्रज्ञया रुद्राख्यदेववरजप्रज्ञया च।

जराघटितगोत्रो जरासम्बद्धगोत्रो मरडिताय इत्यपभ्रष्टभाषा। जरासन्धश्च॥ ४४॥

प्रियतमः स्वोपाध्यायसुतः युधिष्ठिरश्च॥ ४५॥

भूधरो राजा। समर्थौ पूर्वपश्चिमपक्षाधिपौ। भूधरसमर्था राजश्रेष्ठाश्च॥ ४५॥

अध्वर्युप्रैषानन्तरा प्रणवान्ता याज्या।

पूर्वभाविनी ऋगनुवाक्या वषट्कारान्ता।

याज्यमहावीरप्रस्तोतृसामादयः प्रवर्ग्यविभवाः।

अनवरतमुच्चमानाः प्रणवान्ता ब्रह्मज्ञानं प्रथमं पुरस्तादित्याद्या ऋचोऽभिष्टवाः॥ ४८॥

वैश्वदेवाग्निमारुतमरुत्वतीयश्रेष्ठा वैश्वदेवसम्बन्धिनीः तत्तन्मन्त्रसम्बन्धेनास्त्ररूपा आयुधसन्ततीश्च॥ ४९॥

'देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन्नहं प्रथमः पिबेयमहं प्रथमः पिबेयमित्येवाकामयन्त ते सम्पाद्यन्तोऽब्रुवन्। हन्ताजिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति तथेति त आजिमयुस्तेषामाजिंयतामभि सृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यताथेन्द्रोऽथ मित्रावरुणावथाश्विनौ। सोऽवेदिन्द्रो वायुमुद्यै जयतीति तमनु परापतत्। सह नावथोज्जयावेति स नेत्यब्रवीदहमेवोज्येष्यामीति तृतीयं मेऽथोज्जयावेति नैति हैवाब्रवीत्। अहमेवोज्जेष्यामीति। तुरीयं मेऽथोज्जयावेति तथेति। तं तुरीयेऽत्यार्जत तत् तुरीय भागिन्द्रोऽभवत्। त्रिभाग् वायुः।' इत्यैतरेयब्राह्मणे (१/९/१)।

'अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु। त्वं हि पूर्वपा असि। देवा दिधिषे पूर्वपेयम्' इत्यादिश्रुति (ऋग्वेद ४/४६/१) सिद्धं तत्॥ ५०॥

सरस्वतीगोदावर्यादिनदीः स्नानपानादिना वृत्तिकरीः स्वर्गादिदानेन प्रवृत्तिकरीर्वाचोऽप्यतीत्य तासां सर्वासां विष्णुविषयत्वसाधनेन मोक्षप्रतिपादनेन।

समतीतगोत्रकः समतीतविन्ध्यादिः समतीतवैश्वामित्रादिगोत्रकर्मा च॥ ५३॥

दशमः सर्गः

समस्कुरुत- 'सम्परिभ्यां करोतौ भूषणे (६/१/१३७)' इति सुडागमः॥ १॥

माधवः - श्रीकान्तो वसन्तोत्तरभागश्च।

भृगुकुलतिलकस्थानम्- परशुरामक्षेत्रम्, शुक्रक्षेत्रं वृषभराशिं च।

सुवृत्तानि- आर्यागीत्यादिकानि, सुचरितानि च।

नायकः- काव्यप्रतिपाद्यगुणः स्वामी च ।। २ ।।
न । अनेनेन । अनेन । अनेनोनूनेन । ननु । नुन्नाः । नानानाः । नो । नूनम् । नानेनानूनना । अनुन्नः । इति पदच्छेदः । कथमिदं महीयोमतिमाहात्म्यात् सम्भवतीत्याशङ्क्याचोच्यते । अनेन अनेनेन ननु नानानाः न नुन्नाः नो । अनेन- प्राणांशेन ननु नानाप्राणिनः न प्रेरिता नो । अनाः- प्राणास्तत्सम्बन्धित्वादानाः प्राणिनः । कीदृग्भूतेन अनेनोनूनेन- अनेनाश्रायमनूनश्चेति । नूनम्- प्रायः, कुतः नानेनानूनना नानेनेषु- नानेश्वरेषु- ब्रह्मरुद्रादिषु, अनूनना । पूर्णपुरुषः अनेनाप्रेरितः ।। ६ ।।
यं स्मरतामशेषसंसारप्रभवोऽसुखाब्धिरपैति ।
यत् स्तवने च रता यमानन्तरुद्रसमर्था भान्ति स्म ।। ७ ।।
किं ललाटे इति पृष्टो राज्ञा करेण गदां भवन्तो बिभ्रन्ति वयं ललाटे इत्यूचे इत्याद्यशब्दार्थः ।। १७ ।।
करतलगतपटपिण्डं कनकमिति विचिन्त्य हन्तुकामा मध्वं परस्परं जघ्नुः ।। २० ।।
अन्यत्र-
दस्यूनवाप्तानवलोक्य सोऽब्रवीत् को मेऽस्ति शिष्यो विभयो जवीत्यलम् ।
अभ्यासवांस्तूर्णमुपेन्द्रतीर्थस्तत्तेजसा क्रूरचमूं प्रभोऽभ्ययात् ।। २१ ।।
अपरत्र च-
अचलास्तिष्ठतेत्युक्त्वा शिष्यान् दस्यूनवश्चयत् ।
मध्वस्तेऽपि गताः पश्चात् तत्र नैक्षन्त कञ्चन ।। २२ ।।
अन्यत्र च-
मध्वं दुर्विषहं मत्वा देवं सङ्गृह्य चाग्रतः ।
आयान्तं सत्यतीर्थार्यं जिघांसुर्व्याघ्र आपतत् ।। २३ ।।
तीर्थं स्वपार्श्वभूमिं च मोक्तुं नेच्छति सन्मतौ ।
त्वत्स्नानाम्बुनि गङ्गा स्याच्छिलास्वास्वहमित्यदात् ।। २४ ।।
जनता जनसमूहः । ग्रामजनबन्धुभ्यस्तल् (४/२/४३) इति तल् ।। ३२ ।।
वीरंमन्या 'आत्ममाने शश्च' (३/२/८३) इति खश् ।
'अरुर्द्विषदजन्तस्य मुम्' (६/३/३७) इति मुम् ।। ३८ ।।
ज्ञानपदार्थं पृच्छन्तं प्रति भगवानूचे- त्वं येन केनचिज्ज्ञानेन सहितो न वा । 'ज्ञान्यस्मि' इति वदसि चेद् ज्ञानाङ्गीकारिणा त्वया स ज्ञानपदार्थो ज्ञात एव । नेति वदसि चेत् सर्वज्ञानरहितस्य तव प्रश्नशब्दानां तद्विषयाणां चार्थानामज्ञानात् प्रश्न एव न घटेत ।। ४३ ।।
असमये अये इष्टधिया जगतो जननं वर्तते । अये दैवे ब्रह्मणि वर्तमानया स्वेच्छाविषयया बुद्ध्या जगतो जननं न तु मायया । समये समये- काले काले । समये- वेदान्तशास्त्रे प्रथिते न त्ववाच्ये । इदं समया- इते अस्य चेतनजातस्य समीपे गते न तु अनेनैक्यवति । 'अभितः परितः' (वार्तिक १३७) इत्यादिना द्वितीया । न केवलं जननं सनिरासं ससंहारं, स्थितियुक् च । स्ववभासमये स्वच्छज्ञानमये न तु अशुद्धे ब्रह्मणि । असमया- असदृशया ।। ४५ ।।
वर्तस्वेत्यादौ 'समुच्चये अन्यतरस्याम्' (३/४/३) इति हिस्वयोः समुच्चयार्थत्वम् ।
अध्यधीत्यत्र 'उपर्यध्यधसः सामीप्य' (८/१/७) इति द्विर्वचनम् ।
द्वितीया च-
'उभयसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ।। (वार्तिक-१३६)
-इति अनेन जगता दीव्यति च । 'दिवः कर्म' (१/४/४३) चेति कर्मत्वं करणस्य । 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम् (२१/५६) इति कर्मणि षष्ठी च । दुष्टानुज्ञासयति च ।। ४६ ।।
सा व्याख्या प्रकाशयामास ।। ४७ ।।
या मायया अनया आस मायावाद्यभिमतया मायया जगन्मिथ्यात्वसाधिकया नमनरहिताऽभूत् । गुणगुण्यादीनां भेदे

सम्बन्धापेक्षयाऽनवस्था । अभेदे गुणादिमात्रं गुण्यादिमात्रं वा । भेदाभेदे स्वव्याहतिरिति तेषां खण्डने परेषामनुयोग एव । तस्मान्मायामय एवेति तत्पक्षे मायापालिते नमन्ति (नमनन्ति) ह्यपरे। समानया 'इन्द्रो मायाभिः पुरुरूप ईयते' इति मानाभाससहितया । इयं व्याख्या गुणगुण्यादिभावं विशेषाङ्गीकारेणैवाभेदेन घटयित्वा मायाशब्दस्य च 'मायेति भगवत्प्रज्ञा' इत्यादिना विषयान्तरं प्रदर्श्य तन्मायां वन्ध्याकुमारीसमानां करोति। ततया व्याप्तया अयमा अद्वन्द्वा। नयासनानास न ॥ ४८ ॥

'विषयस्तद्विचारश्च हेतूदाहृतिसंशयाः ।
पक्षौ प्रयोजनं चैव नयोऽष्टाङ्गः प्रकीर्तितः ॥ ४८ ॥

-इति प्रसिद्धो नय आसनं यस्याः सा नयासना नास न न बभूवेति न । सा व्याख्या अर्थान् प्रकाशयामास । अतया । तद्विरुद्धया दुःशास्त्रव्याख्यया यातना भवति। अललना ललनं विलासः सुखं तद्रहिता। नियमेनान्धतमसक्लेश इत्यर्थः। अथवा मायया क्रियमाणया यातना ॥ ४८ ॥

तपस्विवत् स्थितं डाम्भं ज्ञात्वा मारीचमभ्यधात् ।
मध्वः परीक्षया चैनं ते विष्णुद्वेषिणं विदुः ॥
यौधोऽत्र राजाऽहमितीरितो गुरुं तवायुधं केति जगदा सत्यवाक् ।
खातेऽमुनोक्ते कुतले महागदां दृष्ट्वाऽऽप्तवाचं श्रद्दधुर्गुरुं हि ते ॥ ४९ ॥

अन्यत्र

'ततोऽयमायाति तमर्चयेति स्थानाधिकारी जटिनं त्रिशूलिनम् ।
स्वप्ने ब्रुवाणं त्रिरवेक्ष्य दूरतः प्रायादुदन्तं च जगाद विस्मितः ॥ ५० ॥
पञ्चत्रिकं पञ्चदशकं तद्युगं त्रिंशत् ॥ ५२ ॥
देवैः समं रहसि देवगृहे प्रवृत्तो राज्ञा कवाटविवृतौ प्रसभोदितोऽसौ ।
ऊचेऽधुना व्रजसि चेदिह नश्यसीति राजाऽथ विस्मितमना व्यवृणोत्कवाटम् ॥
रक्तेक्षणं पुरुषसिंहमवेक्षमाणः सद्यो भयान्निजपुरोहितमाह्वयत्सः ।
क्षन्तव्यमित्यसकृदानमति द्विजेऽसौ षण्मासमायुरददात् नृपतेर्दयालुः ॥
राज्ञाऽर्थितोऽत्र वसतावखिलांश्च शिष्यान् प्रस्थाप्य वायुवदभू(गा)दखिलैरदृश्यः ।
षष्ठेऽथ मासि परचक्रपराक्रमेण राजा सराज्यनगरो विवशो ननाश ॥ ५२ ॥

गोविषयस्य 'पशुपे' इत्यपभ्रष्टभाषा ॥ ५३ ॥

दिव्यगेयविदग्धोऽसौ सर्वज्ञ इति याचितः ।
विद्वद्भिरत्र कृतवान् गानशास्त्रं सुदुर्लभम् ॥ ५३ ॥

सफलमनः- सफलसुचित्तं, फलपुष्पसहितं च ।
अविपल्लवं विपदो लवेनापि रहितमविगतपल्लवं च ॥ ५६ ॥

एकादशः सर्गः

विचन्द्रायां क्षपायां तु चन्द्रिकाभ्रमिणो जनाः ।
शेषस्य तेजस्यथ तं यान्तं मध्वो व्यदर्शयत् ॥ १ ॥

'शब्दयोनिः' इत्यारभ्य 'श्यामावदाताः शतपत्रलोचनाः' इत्यादिशुकोक्तिः ।
'धानापूपा मांसकामाः सदा पायसकर्दमाः' इत्यादिशारदोक्तिः ॥ ६ ॥
'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' (७/३/१९) इति पूर्वपदवृद्धिः । सौरसैन्धवपयोभिः ॥ १० ॥
आच्छादनं स्याद्वलभी गृहाणां गोपानसी दारु च वक्रसंस्थम् ।
नीप्रं वलीकं पटलान्तमाहुः कपोतपालीं च विटङ्कसञ्ज्ञाम् ॥ इति ॥ १० ॥
विकटा श्रेष्ठा च ॥ ११ ॥
अन्या असुचिरद्युतिर्विद्युतो दधति ।

अम्बरं च स्वयं न दधति किन्त्वम्बरेण धार्यते दुन्दुभिस्वनश्चेति।
सुपयोधराः सुकुचाः सुजलधराश्च।
'द्व्यष्टवर्षा तु या योषिच्छामा जलधरावलिः।' इति जलधरावलित्वं चात्र गुणतो न कालतः॥ २९॥
परभागो गुणान्तरसम्बन्धात् गुणोत्कर्षः यया श्वेतसिचये कौस्तुभतन्तुतत्या॥ ३०॥
करपल्लवादिभिः प्रगतासु। इत्थम्भूतलक्षणे तृतीया॥ ३२॥
किल अपरमार्थे॥ ३६॥
कुवलयादीक्षणमरविन्दवद्रुचिराननम्। शुकवच्छोभनस्वरः। हंसकं चरणाभरणं प्रियायाः। शरदस्तु कुवलयमेव ईक्षणमरविन्दमेव रुचिराननम्। शोभनशुकस्वर एव स्वरः मुखराः श्वेतच्छदाः॥ ४३॥
हिमऋतुः 'ऋत्यकः' (६/१/१२८) इति प्रकृतिभावः।
सुसखा 'राजाहःसखिभ्यष्टच्' (५/४/९१) इति टचो 'न पूजनात्' (५/४/६९) इत्यपवादः॥ ४४॥
सुखबोधावेव सौरभसुरूपगुणाश्चास्य- 'सदेहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः' इति श्रुतेः॥ ७२॥
वैकुण्ठे वर्तमानानां जनानां श्रीविशेषाश्चित्तवाचामगोचराः।
वैकुण्ठेन प्राप्ते। लक्ष्मीगरुडानन्तब्रह्मादिभिः शक्रादिनानाविशिष्टजनैश्च श्लाघ्ये तत्र युक्तमेवंविधत्वम्॥ ७७॥
'स यदि पितृलोककामो भवति सङ्कल्पादेव पितरः समुत्तिष्ठन्तीति। स यदि स्त्रीलोककाम' इत्याद्युक्त्वा यं यमर्थमभिकामो भवति।
'(सोऽस्य सङ्कल्पादेव भवति) यं यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति, इत्यादयो वेदाः॥ ७८॥
द्वादशः सर्गः
चोलजः पद्मतीर्थो नाम।
'यो गुप्तपटलोक्तायां भैरवीचक्रसङ्गतौ।
साङ्कर्यां परविद्यायां महावाग्म्यसतां गुरुः॥'
द्वीपी पुण्डरीकपुरी॥ २॥
अशुभानां धारकस्य चोलजस्य अलोलं स्थिरं कोपि कोपविशिष्टं सज्जनेषु मात्सर्यं बद्धुं गामूचे।
कोऽप्यलं वाचालः शकुनेः समानः॥ ३॥
साधीयः- द्विवचनविभज्योपपदे तरपीयसुदौ (५/३/५७) इतीयसुन्। 'अन्तिकबाडयोर्नेदसाधौ' (५/३/६३) इति बाढशब्दस्य साधादेशः॥ ५॥
भाट्टा- भट्टानुव्रता वनपरिचयरहिताः। अर्कप्रभा अविरलतरुमत्त्वात्।
महायानिका बौद्धा महायानसम्बन्धिनश्च॥ ८॥
जालं समूहः जलचरबन्धकं च।
गौणा माधुर्यवाग्मित्वादिगुणसम्बन्धिनस्तन्तुकृताश्च।
शङ्खचक्रम्। शङ्खानां कम्बूनां मण्डलं च॥ १४॥
उक्त्वा खलु- न वक्तव्यम्। 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' (३/४/१८) इति॥ १६॥
बाध्यतां बाधज्ञानगम्यतां बाध्यतां च॥ ९॥
पालनवशीकरणस्तम्भनविद्वेषणोच्चाटनमारणानि षट्कर्माणि॥ २०॥
परः शत्रुरन्यश्च॥ २३॥
उक्ताङ्गेभ्यः कादिकान् ''अकुहविसर्जनीयानां कण्ठः' इत्याद्युक्तस्थानेभ्यः ककारादीन् 'ब्रह्मा शिरसि, ललाटे रुद्रः' इत्याद्युक्ताङ्गेभ्यो ब्रह्मादिकान् व्यञ्जयन्तम्। तत्तन्मात्राव्यञ्जनादौ कादीनामुचितमात्रानुकूल्येन व्यञ्जने अपरुषव्यक्तत्वे च॥ ३१॥
आदिशब्दात्-
'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्॥

यथा व्याघ्री हरेत् पोतं दंष्ट्राभ्यां न तु पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्॥ इति॥ ३१॥
अपरुषव्यक्तत्वे शब्दतन्मात्रादिसृष्टौ भूतादिसृष्टौ च। किं बहूना तिस्रोऽवस्थास्तद्गुणैः पश्यन्ती मध्यमा वैखरीति शब्दस्फोरणसमये तिस्रोऽवस्थास्तत्तद्देवताध्यानात्मकैर्गुणैः।
'तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थाम्।
वाचं चक्रे करणविशदां वैखरीं च प्रपद्ये।' इति च।
सृष्टिस्थितिसंहारावस्थास्तद्गुणैस्सत्वादिभिश्च॥ ३१॥
आदौ बाल्ये ह्रस्वत्वेन ह्रस्वरूपत्वेन पादौ वर्तयन् गच्छन् मात्रा दृश्यमानः चरणक्षमो मम शिशुरिति प्रीत्या गोवत्सानामनुवृत्त्या। अन्यगोपीश्च विगतवृत्त्यन्तराः कुर्वन् स्वलीलया हि गोविन्दः।
आदिह्रस्वा वत्सानुसृतिरन्त्या वत्सानुसारिणी।
पाकवत्युभयह्रस्वा दीर्घमध्या पिपीलिका।
अर्धमात्रा वत्सानुसृतिस्तथा वत्सानुसारिणी।
पाकवती पादोना पाकमात्रा पिपीलिका॥ इति शिक्षायाम्॥
स ईं महीं धुनिमेतो ररम्णात् सो अस्रातूनपारयत्स्वस्ति। त उत्स्राय धृतवता आदित्या इति एतासां निदर्शनम्। आदौ ह्रस्वत्वेन वत्सानुसृत्याख्यायां विवृतौ कालस्य मात्रापरिमाणस्य चतुरंशस्य द्वावंशौ वर्तयन् दृश्यमानोऽन्याः पाकवत्याद्याश्च विवृतीरग्ग्रूपाः कुर्वन्। (न चान्यथाऽन्वयात् श्लेषस्य न्यायभङ्ग आशङ्कनीयः। रूपाः श्लेषस्य न्यायभङ्ग आशङ्कनेऽत्राहीनेन मूले विरहितपरिकर इत्यादिवत्सम्भवात्। न चात्रान्यथान्वयात् श्लेषस्य समयस्य भङ्गः शङ्कनीयः। रूपाः श्लेषस्य न्यायभङ्ग आशङ्कहीनेन मूले विरहितपरिकर इत्यादिवत् सम्भवात्॥ ३२॥
श्रेयस्करैः शिक्षाद्यङ्गैर्व्यक्ताभिप्राया। अवयवेषु स्पष्टविलासा च। अनुनासिकतया क्रियमाणा वर्धितमात्राः स्वरा रङ्गास्तैरारूढा स्वयंवरप्राङ्गणमारूढा च। स्वरा उदात्तादयश्च॥ ३३॥
शिक्षायां प्रतिपाद्यमानोच्चारणशिक्षया प्रकटितानां लक्षणानां लक्ष्यम्॥ ३४॥
'अग्निना रयिमश्नवत्' इत्यत्र 'ना' इत्ययमाङादेशः। 'आङो नास्त्रियाम्' (७/३/१२०) इति सूत्रात्। तां संहितां श्रुत्वा अग्नीति पदं विभज्य नारेति पदमुक्तवन्तम्।
अनधीतवानपि हि पुण्डरीकपूर्ननु शाब्दिकः कथमिदं वदेदिति। अतिशङ्कि मा दशमतेर्हि किङ्करी सकलस्य चोदयति शारदा गिरः॥ ४०॥
कृष्णाभीष्टा कृष्णस्य व्यासस्याभीष्टा कृष्णेवाभीष्टा च।
शास्त्रमिति विस्पष्टसञ्ज्ञाऽस्याः शास्त्रे भारतादौ विस्पष्टसञ्ज्ञा च।
सद्विजेन लिकुचशेखरेण शङ्करार्येण धौम्येन च॥ ४२॥
सार्यः सश्रेष्ठः। गोगणैर्वाग्गणैः शरगणैश्च।
संयम्य निरुध्य बध्वा च। अन्तर्यन्तृकामेनान्तर्यामिणो वाञ्छयाऽन्तःप्रेरकेण मन्मथेन च॥ ४३॥
योऽसौ पुरा भद्रं सज्जनं क्षेप्तुं हेतुः सौभद्रं च।
सौख्यदाख्यं शङ्करार्यनामानं श्रवणेन स्वसुखकरनामानं च॥ ४४॥
यो जनः पुण्डरीकपुरी द्रौण्यादिश्च।
गोततीः पञ्चषैः गोविशेषैरद्यत्। तेन कृतस्योपन्यासस्यापशब्दार्थ(दि)दोषप्रकटकैः पञ्चषैर्वाक्यैस्तमखण्डयत्। पुनः स्वयमुपन्यासं कृत्वा तमुपन्यासमखण्डयन्तं ससहायं तमपि अनुक्तिनामकनिग्रहस्थानं प्राप्तं चकार॥ ४५॥
अत्र चायं प्रणीत आचार्यप्रियतमैः श्लोकः-
'आनन्दतीर्थपार्थस्य भयादास्ते स पृष्ठतः।
पुरतः स्थापयित्वाऽन्यान् पद्मतीर्थजयद्रथः॥' इति।

‘विष्णुमङ्गलदेशान्ते हृतां कवलिकां निजाम्।
श्रुत्वा रजतपीठस्थ एकवाटं ययौ गुरुः॥
तत्रस्थं चोलजं दृष्ट्वा स्वशिष्यैस्तं रुरोध सः।
त्वच्छास्त्रं साधयसि चेत् प्राश्निकानाह्वयेत्यसौ॥
मध्वस्तेनोदितः प्रोचेऽत्राह्वयेच्छसि चेदिति।
कृतकृत्योऽस्मि मे शास्त्रं व्याप्तमित्युदितेऽमुना॥
प्रोचे मध्वो मम व्याप्तं त्रैलोक्ये शास्त्रमित्यमुम्।
अन्यर्यामी हन्त वेद तवेदं शाठ्यभाषितम्॥
इति ब्रुवाणं तं प्रोचे मध्वः स्मितमुखाम्बुजः।
व्याप्तं त्वय्येव मच्छास्त्रं किमुतान्यत्र बालिश॥
अन्तर्यामी नियम्यश्च त्वयैवाङ्गीकृताविति।
मिलितेष्वथ सभ्येषु प्राश्निकेष्वभवत् कथा॥
तत्र माध्व उपन्यासो ग्रन्थो वादाह्वयोऽभवत्’॥ ४६॥
पुनरपि सभ्यैरभिहितावसरात् पूर्वं तेषु त्रस्तेषु विद्रुतेषु वादावसानपद्यानां मध्वमहाजयमहामहकुतूहलिभिः सद्भिः निगदितानामयमभिसन्धिः प्रपञ्च्यते,
‘द्रवत द्रवताशु मायिनः प्रविशध्वमतन्द्रिता गुहाः।
कमलारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्करः॥’ इत्यास्तामित्यनेन।
त्वदुक्तं सत्यं मिथ्या वा इत्याद्युक्त्वा द्रष्टा द्रष्टा वो निग्रहीता॥ ४७॥
पूर्वेषां ब्रह्मादीनामाशां च॥ ४९॥
शब्दभेदैर्गुणि सन्निर्णीतं वेदैर्ज्ञानादिगुणवन्निश्चितं ध्वनिभिर्गुणवच्च॥ ५०॥
‘आनन्दतीर्थपुंसिंहो मायावादिदितेः सुतान्।
विदार्य युक्तिनखरैरप्रतीपोऽभि(वि)भासते॥
नृहरिः सकलज्ञनामकः समुपैति हि मायिदानवान्।
प्रपलायनमत्र तत्क्षमं त्वरया वो वसतिर्गुहासु च॥’
-इत्यनयोर्विधावतेति।
मायावादिदितेः सुतानित्यत्र ‘षष्ठ्या आक्रोश’ इत्यलुग्भवति दास्याः पुत्र इत्यादिवत्। नन्विदं दैत्यत्वं तत्त्वतस्तेषाम् आक्रोशाभिप्रायत्वादिति। सत्यमेव दितिपुत्रत्वं मा भूदेषां मानुषत्वेन जातानां मायिनां, यदसुरत्वम् अन्धतमसैकयोग्यत्वलक्षणं तदस्त्यतितरामिति।
अत्रिवादा जीवेश्वरजडानां त्रयाणां वादेन वचनेन नियमेन रहिताः तत्त्वतस्तद्वचनानां च अतत्त्वावेदकत्वाङ्गीकारेण॥ ५१॥
स एकरूपमप्यंसे नैव द्विपक्षोऽपि अमृतं मोक्षमपि सर्वेभ्यः॥ ५२॥
‘पलायध्वं पलायध्वं त्वरया मायिदानवाः।
सर्वज्ञहरिरायाति तर्कागमदरारिभृत् (धृक्)॥’
-इत्यस्य वेदव्रातेत्यादिना॥ ५३॥
स्वारामस्य ‘कावु’ इत्यपभ्रष्टभाषा।
‘पाग्रवाटस्य ‘कोडिपाडि’ इति॥ ५४॥
त्रयोदशः सर्गः
‘उत्थाय पौर्णमास्यां स्वाराममितो निशीथ एव गतम्।
श्रुत्वा चोलं त्रासाद् ग्राम्यैः सह दत्तमग्रहीद् ग्रन्थम्॥’

पृथिवीभृज्जयसिंहः ।। १ ।।
परमस्नेहतया- परमप्रणयत्वात् स्नेहवत्त्वाच्च ।। ४ ।।
विषयस्य 'कबेनाड्' इत्यपभ्रष्टभाषा ।। ९ ।।
क्षणदामूषिवांसं 'कालाध्वनोरत्यन्तसंयोगे' (२/३/५) इति द्वितीया ।। १० ।।
निषिद्धकाम्यभावो निषिद्धकाम्यकर्मणोरभिप्रायो निषिद्धत्वं काम्यत्वं च ।। १९ ।।
'वाटः समुवाय' इति ग्रामद्वयम् ।। २४ ।।
निजशिष्यप्रवरेण हृषीकेशतीर्थेन ।। ४० ।।
गुहनामको विपश्चित्- सुब्रह्मण्यपण्डितः ।। ४३ ।।
वेदे कवितायां वेदान्त इति त्रिषु विक्रमोऽस्येत्युचितां त्रिविक्रमाख्याम् ।। ४६ ।।
काव्यफलम् उषाहरणाख्यम् ।। ५० ।।
भानुर्नाम कश्चित् प्राभाकरप्रचुरः ।। ५० ।।
चतुराननं- चत्वार्याननानि ।। ६९ ।।
चतुर्दशः सर्गः
ऊर्जः- शरदः उत्तरः भागः ।
मलिनभावं- मानसभावं नीलत्वं च ।
विश्वं- कार्यमशेषं जगच्च ।। १ ।।
'स्वःसुन्दरीभुजलतापरिरम्भणीधूः पौरन्दरी भजति यं भजतां भुजिष्या ।
आनन्दतीर्थभगवत्पदपद्मरेणुः स्वानन्ददो भवतु ते जयसिंह भूप ।।' इत्याशिषा ।। ४ ।।
अरुणोषस्सवितॄणामुदयास्त्रयः मित्रभूकोशानामुदयाश्च ।
मन्त्रा गायत्र्याद्या गोप्या व्यवहरणविशेषाश्च ।
हृदयशिरश्शिखाकवचास्त्राणि पञ्चाङ्गानि कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद् विनिपातप्रतीकारो देशकालावेक्षणं कार्यसिद्धिरिति च ।
प्रकाशतपनाह्लादनशक्तयस्तिस्रः आह्लादनं वृष्ट्या उत्साहमन्त्रप्रभुत्वशक्तयश्च ।
स्वात्मतेजः स्वस्वामिनो विष्णोर्ज्योतिः सुष्ठ्वात्मनः पराक्रमश्च ।
'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा ।'
षड्गुणाः-
'सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणान् कवयो विदुः ।।' इति च ।। १४ ।।
भद्रजालरन्ध्रगताः सज्जनसमूहमध्यादागताश्च ।। १७ ।।
तुरगदेश्या- तुरङ्गकल्पाः-
'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' (५/३/६७) इति ।। २० ।।
स इमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवं तान् लोकानभ्यतपत्ते(पंस्ते)भ्योऽभितप्तेभ्यस्त्रीणि ज्योतींषि अजायन्ताग्नेरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतिष्यभ्यतपत्ते(पस्ते)भ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त ऋग्वेद एव अग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्याद् वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्रान्यजायन्त भूरित्येव ऋग्वेदादजायत भुवरिति यजुर्वेदात् स्वरिति सामवेदात्तानि शुक्रा(क्रा)न्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति तानेकधा समभरत् तदेतदोमिति' इत्यादि श्रुत्या वर्णिताः ऐतरेयब्राह्मणपञ्चमखण्डिकाप्रतिपादितप्रणवप्रकारो द्रष्टव्यः ।। २३ ।।

त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः।
समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥
षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी।
द्वादशाब्दोपवासस्य विष्णुपादोदसेवनम् ॥
यानि कानि च तीर्थानि ब्रह्माण्डान्तर्गतानि च।
विष्णुपादोदकस्यैते कलां नार्हन्ति षोडशीम् ॥ इत्यभिदधति ॥ २९ ॥
सन्तोऽरा अस्येति सदरम् ॥ ३० ॥
अगन्धमव्यक्तरसं शीतलं च तृषापहम्।
अच्छं लघु च पथ्यं च तोयं गुणवदुच्यते ॥ इति ॥ ३३ ॥
सुसुरभिसुमनोभिः- सुष्ठुसुगन्धिपुष्पैः-
'पूरयन्ति दिशः सोमं देवा गावः सरस्वती।' इति च ॥ ३४ ॥
अर्घ्य-पाद्य-आचमनीय- मधुपर्क-पुनराचमनीय-स्नान-वस्त्र-भूषण-यज्ञोपवीत-आसन-गन्ध-पुष्प-धूप-दीप-नैवेद्य-नमस्काराः षोडशोपचाराः ॥ ३६ ॥
अगुणा अन्यचित्तत्त्वादयः ॥ ३६ ॥
'भुक्त्वा पीत्वाऽर्चनं दन्तकाष्ठाभक्षुपसर्पणम्।
मैथुनानन्तरं चार्चा शवं दृष्टोपसर्पणम्।
अर्चान्तरे मूत्रविष्ठाविसर्गौ सास्रभाषणम्।
नीलवस्त्रावृतस्यापी राजान्नात्तिरुपागतिः ॥
उपस्पृश्याविधानैस्तु शुश्रूषोरपि रुष्टता।
अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता ॥
नीलवस्त्रैर्हरेः कर्मविधिः स्पृष्टिस्तमस्यपि।
कामानुसारिता कृष्णवस्त्रस्य परिधूननम् ॥
श्वस्पृष्टिः कोलमांसात्तिर्जालपादासनं तथा।
उपसर्पः पङ्किले च चितिं स्पृष्ट्वोपसर्पणम् ॥
पीण्याकात्तिश्चोपसर्तुः पोत्रिमांसोपपादनम्।
उपयातुर्मद्यपानं कुसुम्भदलभक्षणम् ॥
परप्रवारणग्राहः स्वञ्जनादेरकल्पनम्।
पुष्पदाने धूपदानं हरिवोढुरुपानहौ ॥
अभेरिहर्तुरभ्याप्तिरजीर्णान्नस्य पूजनम्।
द्वात्रिंशदपराधास्तु कथिता गुरुदोषदाः ॥
वसुन्धरायै कोलेन विष्णुना प्रभविष्णुना' इति च।
'मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे।
पादुके चेति विज्ञेया उपचाराः परे बुधैः ॥' इति षडनूपचाराः ॥ ३६ ॥
'आराधयामि मणिसन्निभमात्मबिम्बं मायापुरे हृदयपङ्कजसन्निविष्टम्।
श्रद्धानदीविमलचित्तजलाभिषेकं भावाष्टपुष्पविधिना हरिमर्चयामि ॥'
-इति भीमवचनम् अनूदितं तमित्यादिना ॥ ३७ ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ। शौचं तुष्टिः सर्वसमर्पणमित्यष्टभावपुष्पाणि।

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः।
सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते ॥
ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तु सप्तमम्।
सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः ॥' इति च ॥ ३७ ॥
'प्रायः सोऽयमनायासं पूज्यते परमेश्वरः।
प्रीयतामिति तद्भक्त्या सततं वेदशालिभिः ॥'
इति भगवता स्वयमेवाभिहितमनूदितं परमित्यादिना ॥ ३९ ॥
'संविद्रते वेत्तेर्विभाषेति' (७/१/७) रुट् ॥ ४५ ॥
आज्योतिषो दर्शनात्।
'पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात्।
उत्तरां तु समासीत सम्यगृक्षविभावनात् ॥' इति विहितम् ॥ ४९ ॥
रौद्रं गवि सद्वायव्यमुपावसृष्टमाश्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं पौष्णं समुदयन्तं मारुतं विष्यन्दमानं वैश्वदेवं बिन्दुमन्मैत्रं शरोगृहीतं द्यावापृथिवीयमुद्वासितं सावित्रं प्रक्रान्तं वैष्णवं ह्रीयमाणं बार्हस्पत्यमुपसम्पन्नमग्नेः पूर्वाहुतिः प्रजापतेः उत्तरैन्द्रं हुतम्' इति श्रुत्युक्ताः षोडशदेवताः।
अतिसृजन्तोऽग्रय इदमित्यादिरूपेण 'वाहिताग्न्यादिषु' (२/२/३७) इति परनिपातः। 'गायत्रीलोकमाप्नोति' इति श्रुतौ गायत्रीशब्दोदितस्य विष्णोर्लोको ज्ञानद्वारा भवतीति ॥ ५० ॥
द्विजाः स्त्रीदन्ता नक्षत्राणि च। नगा गिरयो वृक्षाश्च ॥ ५३ ॥
मृदुगामिन्यो विमानसम्पद आसां मृदुगामिन्यश्चैता विगतमानसम्पदश्चेति च।
गोपाः स्वर्गपाः पशुपाश्च।
ततं व्याप्तं वीणादिवाद्यं च ॥ ५४ ॥
गतिदं मोक्षदं मार्गदं च।
निशायां भागवतं व्याचक्षाणः श्रीमन्मध्वः कृष्णादिरूपं प्रकाशितवानिति भावः ॥ ५५ ॥
पञ्चदशः सर्गः
अमरालयस्य 'कुडिल्' इत्यपभ्रष्टभाषा। ग्रामस्यापि ॥ १ ॥
स्वभक्तविषये खण्डितषड्ऊर्मिकस्य हरेः प्रेष्ठा उपन्यासभारती सागरजा लक्ष्मीश्च।
सादिभिर्वर्धितोर्म्याख्या गतिविशेषवदश्वप्रेष्ठा सेना ॥ ६ ॥
सागरापत्यश्रीश्च स्वोदयेन वर्धितकल्लोलचन्द्रप्रेष्ठा।
सागरसम्बन्धिनी कान्तिश्च ॥ ६ ॥
सुकुचा सुस्वरा रमा। सुजलधरवद्गम्भीरसुस्वरा अन्या। सविस्तरं प्रकाशाभिप्राया गीः। सविस्तारस्वरूपतेजोद्रव्यात्मिका रमा। सविस्तारप्रादुर्भावेन प्रयोजनं शत्रुभीषणं सेनायाः। सयज्ञप्रकाशप्रयोजना सागरापत्यं श्रीः। सविस्तारतेजोयुक्तरत्ना- ख्यार्थवती अन्या ॥ ६ ॥
'नारायण' इत्यादिपद्योक्तस्यार्थस्य साधकः 'प्रधानम्' इत्यादिप्रबन्धः ॥ ८ ॥
युक्त्येति पदस्य कृत्यरूपेण 'प्रधानम्' इत्यादिना साङ्ख्यानां मतमनूद्य दूष्यते।
साध्यवैकल्यं पयसोऽपि विष्ण्वधीनत्वात् 'न ऋते त्वत्' (ऋग्वेद, १०/११२/९) इत्यादेः ॥ ९ ॥
आदिशब्देन ईश्वराङ्गीकारेऽपि तत्तदीश्यत्वेनाङ्गीकारः चार्वाकस्य देहव्यतिरिक्तचेताङ्गीकारश्च वेदितव्यः।
ईशानपेक्षायामित्यादिनाऽर्थतोऽनीश्वरवादिनो भाट्टादयश्च निरस्यन्ते ॥ ११ ॥
कारणमित्यादिना भास्करादयः ॥ १४ ॥
नन्वित्यादिना वैशेषिकादयः।

'सौख्यादिमान्' इत्यादिशब्देन क्रिया ग्राह्या ।। १६ ।।
'यः सर्वज्ञः सर्ववित्' 'आनन्दं ब्रह्मणः' इत्यादिर्वेदः ।। १८ ।।
तदनेकत्वं समवायस्यानेकत्वम् ।। २० ।।
सत्यश्चेत् तदनेकत्वमसत्यश्चेत् समवायैक्यादीशे दुःखमित्युक्तदोषद्वयम् ।
परं सदसद्विलक्षणं स्वव्याहतम् ।। २१ ।।
अवर्णनीयं वागविषयत्वेन । न हि प्रमेयसम्बन्धरहितं प्रमाणं भवति ।। ३३ ।।
'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि जहल्लक्षणया ।
'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादीनि अजहल्लक्षणया ।
'तत्त्वमसि' इत्यादीनि जहदजहल्लक्षणया ।। ३४ ।।
आद्यशब्देन विज्ञानस्फोटकालाद्वैतानि ।। ४१ ।।
विमतानि भगवद्वाचकानि न भवन्ति असद्विषयत्वात् शशविषाणवदित्याद्यूहनीयम् ।। ४२ ।।
दुःखाकरोति विपरीतीकरोति 'दुःखात् प्रातिलोम्ये' (५/४/६४) इति ढाच् ।। ४६ ।।
स्वव्याहत्यादिना प्रमाणविषयत्वेन च । निर्विशेषब्रह्मता कदा कथमित्यनुयोगे ज्ञानोत्तरं ब्रह्मभावेनेत्याद्युत्तरे ज्ञानोत्तरकालसम्बन्धः इत्यादयो विशेषा मुक्तेः । तूष्णीं भावे निग्रहस्थानम् ।। ४८ ।।
अपीत्यादिना निर्विशेषमोक्षो वैशेषिकादिविवक्षितो बुद्ध्यादिविरही च ।। ४९ ।।
विज्ञानेत्यादिना चरममेव । तं च तादृशमेव कुर्यात् । जीवं ज्ञानप्रयत्नवाञ्छावन्तमेवाशुभभोगभुञ्जानं कुर्यादीश्वरः ।। ५० ।।
ईश्वररूपं च । बद्धे दुःखव्याप्तं दृष्टम् । विमुक्तो मुक्तो न स्यात् । तथा चायं प्रयोगः- विमतः स्वरूपशून्यो दुःखरहितत्वात् यः स्वरूपशून्यो न भवति स दुःखरहितो न भवति यथा संसारीत्यतिप्रसङ्गः ।। ५१ ।।
एवं ज्ञानानन्दादि साधयित्वा देहादि साध्यते मुक्तौ- नन्वित्यादिना ।। ५२ ।।
ज्ञात्रादिरूपमेव देहश्चेत् स्यान्नाम ।। ५४ ।।
तत्रापि नावयवितेत्याशङ्क्य निरस्यते 'विमत' इत्यादिना ।। ५६ ।।
'मुक्त' इत्यादिना इन्द्रियवत्त्वं प्रसाध्यते ।। ५९ ।।
भाट्टादेरनीश्वरत्वादित्ययं दृष्टान्तो नेष्टश्चेत् ।। ६१ ।।
'यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामस्तत्र माममृतं कृधि ।।' इति वेदोक्तिः ।। ६२ ।।
अर्थान्तरमग्नेश्च विपरीतं जयादिकं च ।। ६८ ।।
सुसखा- 'राजाहःसखिभ्यष्टच्' (५/४/९१) इत्यस्य 'न पूजनात्' (५/४/६९) इत्यपवादः ।। ७७ ।।
निरन्तरमलेखयत् ।। ८९ ।।
विशुद्धद्विकुलमित्यादि हेतुगर्भः ।। ९६ ।।
अनुगिरं 'गिरेश्च सेनकस्य' (५/४/११२) इति टच्समासान्तप्रत्ययः ।। १०६ ।।
शिलामध्यास्त 'अधिशीङ्स्थासां कर्म' (१/४/४६) इति ।। १०८ ।।
चतुरास्योऽपि चतुर्वदनोऽपि ।। १२४ ।।
हृषीकेशतीर्थाः ।
जनार्दनतीर्थाः ।
नरहरितीर्थाः ।
लोकैरभ्यस्तं 'उपेन्द्रतीर्थाः' इति नामैषाम् ।। १२८ ।।
'अदीर्घ इति अर्थतोऽन्यत् 'वामनतीर्थाः' इत्यभिधानमेषाम् ।
अल्पीकृतलौकिकव्यवहाराश्च ।

रामतीर्थाः।
अक्षजं-प्रत्यक्षमधो यद्गुणेभ्यस्तेऽधोक्षजतीर्था इति।
'हृषीकेश' इत्यादि सूचितं 'भक्तिः वैराग्यसागराः' इति।
सर्वत्रापि तीर्थशब्दोऽभिप्रेतः। सागरस्यापि शुद्धतीर्थत्वात्। एतेषां एतानि नामानि गुणयोगैर्वर्तन्त इति प्रकटयितुं तत्तद्गुणवत्त्वकथनेन सूचितानि। यथायोग्यं सर्वेषां सर्वगुणवत्त्वज्ञापनाय च॥ १२९॥
एषां प्रशिष्याणां शिष्यास्तथा बहवः॥ १३२॥
त्रयः- त्रिविक्रमाचार्याः शङ्करार्यौ द्वौ च॥ १३५॥
किं बहुना तदा धरायां जातैः सद्भिः पूज्यः।
शयनैकादश्यामतीतायाम्।
सन्मठे 'तान्त्र्य' इत्यपभ्रष्टनाम्नि अधिवासे॥ १४०॥
षोडशः सर्गः
इदमाकूतम्- या औषधीरित्यादिसूक्तैर्जपैरोषधीबीजेभ्यः सद्यः पुष्पफलादिनिष्पत्तिरुच्यते वैदिकैः, न चोपलभ्यते। ततस्तेषां व्यभिचारित्वम्। स इह च प्रयोगः- 'विमतं वाक्यं न मानं व्यभिचारित्वादुन्मत्तवाक्यवदिति'। अथ च सर्वो वेदो अप्रमाणं वेदत्वाद् व्यभिचारि(वेद)वाक्यवदिति॥ ३॥
विशुद्धमातापितृजन्यत्वादिमूलाधिकाराद्धि फलमुच्यते इति व्यभिचारित्वहेतोरसिद्धिद्योतको नास्ति कोऽप्यधिकारी योग्यत्वे सति अनुपलभ्यमानत्वात् खरविषाणवदिति॥ ४॥
ओषधीनाम्- मुद्गाह्वयानाम्॥ ५॥
यतमानसाम्- यतीनामितरेषां गृहिणाम्॥ १०॥
विविधगुणज्ञानाख्यरत्नः- विविधवर्णतेजस्करत्नश्च।
लावण्यम्- सौन्दर्यं लवणभावश्च॥ १५॥
गण्डवाटस्य 'कोडिञाडि' इत्यपभ्रष्टभाषा॥ २५॥
पूर्ववाटस्य 'मूडेम्बाडि' इत्यपभ्रष्टभाषा॥ ३१॥
पूर्वशब्देन वासुदेवोग्रामोदादायः॥ ३३॥
श्वादयः क्रमेण प्रत्यर्थादिदृष्टान्ताः॥ ३५॥
पारन्तीसुरसदनस्य 'केकुटदेवल' इत्यपभ्रष्टभाषा॥ ३६॥
सरिदन्तरस्य 'इडेतुदे' इत्यपभ्रष्टभाषा॥ ३८॥
उच्चस्य 'उजेर्य' इत्यपभ्रष्टभाषा॥ ४१॥
छन्दसां वै षष्ठेनाह्नाप्तानां रसोत्यनेदत्। सप्रजापति-रभिभेत् पराङ् यं छन्दसां रसो लोकानभ्येष्यतीति तं पुरस्ताच्छन्दोभिः पर्यगृह्णात्। नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभेत्यादीति॥ ४२॥
तत्र नीवीव नर्देत्सहिता सान्यूङ्ख इत्यस्य यथा नीवी वस्त्रं सुधौतं विकासितं नर्देत् यथा नर्देत्। स एव हि तासान्यूङ्ख इति॥ ४३॥
भगवदुक्तं श्रुत्वा निर्हेतुकं नेत्युक्तवान्। तेन पृष्टः स्वयमविद्वानपागमत्॥ ४४॥
'महानाम्नीनामुपसर्गानुपसृजति' - इत्यादिखण्डस्य॥ ४५॥
अमृतं मोक्षश्च॥ ४६॥
मूर्छयित्वा स्वरविकासानामादिं कृत्वा। आदिस्वरावस्था 'मूर्छना' इत्यभिहिता। तानानामुचिततया- असङ्करत्वेन। गानाद्वानान्तरप्राप्तिः तानम्। एकैकधनुर्मण्डलमात्रं श्रुतिः। पञ्चमाद्या 'स्वराः'।
'(द्वे द्वे निषादगान्धारौ त्रिश्रुती दैवतर्षभौ।)
चतुःश्रुतय उद्दिष्टाः षड्जमध्यमपञ्चमाः' इति।
सरिगमपधनि इति क्रमः। श्रुतिसमुदायो ग्रामः। 'षड्जग्रामो मध्यमग्रामो गान्धारग्राम' इति त्रिविधो ग्रामः। तत्र गान्धारस्तु

द्युविषय एव ।
'सप्तस्वरास्त्रयो ग्रामा एकविंशतिमूर्छनाः ।
तानान्येकोनपञ्चाशदेतद् ग्रामस्य लक्षणम् ।।' इति च ।
'काकिश्च तुम्बुरुश्चैव कण्ठदोषौ प्रकीर्तितौ ।' इति च ।। ५० ।।
आवसन्तम् 'उपान्वध्याङ्वस' (१/४/४८) इति कर्मत्वम् ।। ५४ ।।
सुरनाथगुरुः सुरभीकृतदिङ्मुखया नवचन्दनमिश्रितया ।
अतिकोमलया तुलसीप्रसवच्छटयैक्ष्यत पुम्भिरसौ लसितः ।। १ ।।
प्राणाधीशः प्राण उक्थो ज्येष्ठः श्रेष्ठोऽखिलेश्वरः ।
पाप्मनाऽविद्ध इत्यादिनानोपनिषदीरितः ।। २ ।।
स 'देवश्रेष्ठ' इत्यादिभारताद्यैश्च वर्णितः ।
प्राण इत्येव लोकैश्च स महामहिमा ह्यतः ।। ३ ।।
सर्वज्ञानबलादीनामनुसन्धानसुक्षमः ।
प्राणावतारेष्वभितस्तस्मान्नात्राप्यपूर्णता ।। ४ ।।
सामर्थ्यांशांशमेवात्र प्रादुश्चक्रे जगद्गुरुः ।
तत्राप्यमर्त्यदृश्यांशो देवैरेवान्वभूयत ।। ५ ।।
चर्या दृष्टा नरैः काश्चिद्विस्मृता देवमायया ।
अविस्मृताश्च पुरुषैर्नास्माभिः सकलाः श्रुताः ।। ६ ।।
श्रुताश्च काश्चिन्नैवोक्ता देवगुह्यत्वनिश्चयात् ।
अन्यास्तथैव न प्रोक्ता ग्रन्थबाहुल्यभीतितः ।। ७ ।।
उक्ताश्च विस्तृता नैव तस्मादेवात्र कारणात् ।
प्रायेण नैकमात्रोक्ताः कथिता इह सर्वशः ।। ८ ।।
मया दृष्टा ध्रुवमिति प्रोक्ताः प्रायेण पूरुषैः ।
द्वयोर्वक्त्रोर्विरोधेऽत्र स्वीकृता प्रबलस्य गीः ।
तुल्येन सूक्ष्मदृष्ट्यादौ देवे नैव परीक्ष्यते ।। ९ ।।
काव्यश्रिये वा गुरुकीर्तये वा प्रोक्तं स्वयैवातिमनीषयेति ।
तस्मान्न शङ्कचेत महाजनेऽस्मिन् पुंसा कुशाग्रीयधियाऽप्यवश्यम् ।। १० ।।
मन्दप्रबोधजनतोपकृतिं विधित्सुर्मध्वप्रसङ्गपरमोत्सवलम्पटोऽसौ ।
कृत्वाऽपि मध्वविजयं व्यधितास्य किञ्चित् भावप्रकाशनमिदं हरये नमोऽस्तु ।। ११ ।।
त्रिविक्रमविपश्चितो गुणनिधेः सुशिष्याः सुता सतामभिमतास्त्रयो यस्तृतीयोऽत्र नारायणः ।
स मध्वविजयं व्यधाद्गुरुगिरा सदानन्ददः प्रसीदतु ततः सदा दशमतिः स नारायणः ।। १२ ।।
।। इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यरचितायां (आनन्दाङ्कितस्य)
स्वकृतश्रीमध्वविजयमहाकाव्यस्य भावप्रकाशिकाख्यटीकायां षोडशः सर्गः ।।
।। इति सुमध्वविजयभावप्रकाशिका ।।